INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(5), January :2021
Online Copy Available: www.ijmer.in

# पण्डितप्रबोधकुमारमिश्रकृत-तमसादूतकाव्यस्य दार्शनिकतत्त्वालोचनम्

**शान्तनुदासः**
SACT अध्यापकः, नगरमहाविद्यालयस्य, मुर्शिदाबादमण्डलस्य, पश्चिमबङ्गप्रदेशस्य।

**[शोधसारः** –दूतकाव्यस्येतिहासे आधुनिककविरस्ति पण्डिप्रवरः प्रबोधकुमारमिश्रः। संस्कृतसाहित्यजगति कवेरस्य योददानमतिमहत्वपूर्णमस्ति। कविनानेन दूतकाव्यपरम्परायां सप्तदूतकाव्यानां संयोजनं कृतम्। तेषु दूतकाव्येषु राजनैतिक-सामाजिक-सांस्कृतिकविषयानां परिवेशनमधिकाधिकतया दृश्यते। किन्तु तमसादूतकाव्ये भिन्नतया कवेः दार्शनिकचिन्ता प्रकटिता। अत्र योगिरूपेण कविरात्मनः स्वरूपं प्रतिष्ठितम्। एकस्य योगिनो दृष्टौ जगतः रहस्यं तेन दर्शितमत्र। सृष्टेः पूर्वावस्था, ब्रह्मसाक्षात्कारस्योपायः, जगतोऽसारता, दुःखस्य स्वरूपम्, दुःखात् निवृत्तिः काव्येऽस्मिन् विधृता। एते विषयास्तु दार्शनिकतत्त्वात्मकाः। अतः तमसादूतकाव्यस्य दार्शनिकतत्त्वालोचनं शोधपत्रेऽस्मिन् क्रियते।

**कूटशब्दाः** –आधुनिककविः, अतिमहत्वपूर्णम्, दूतकाव्यपरम्परायाम्, तमसादूतकाव्ये, दार्शनिकतत्त्वालोचनम्।]

संस्कृतकाव्यस्यावान्तरभेदः पण्डितैः कथितः। तेषु दूतकाव्यमन्यतमम्। लौकिकसंस्कृतसाहित्यस्य सर्वश्रेष्ठं दूतकाव्यमस्ति महाकविकालिदासस्य मेघदूतम्। तमनुसृत्याधुनिककवयोऽपि दूतकाव्यानि विरचितवन्तः। तेषु कविषु आधुनिकदूतकाव्यानां परम्परायामतिमहत्वपूर्णकविरस्ति पण्डितः प्रबोधकुमारमिश्रः। स्वर्गीयसोमनाथमिश्रस्य सूताः प्रबोधकुमारमिश्रमहाभागा ओडिशाप्रदेशस्य कटकमण्डलेऽवस्थिते सरपडा इति ग्रामे अजायन्त। कवेरस्य ग्रामः कटकनगरात् पञ्चसप्ततिकिलोमिटरदूरे अवस्थितः। तस्य पितुः पत्नीद्वयमासीत्। ते यथा श्रीमती उदियादेवी श्रीमती रमादेवी चेति। पण्डितः प्रबोधकुमारमिश्रः श्रीमतीउदीयादेव्याः पुत्र इति। ख्रिष्टीयत्रिचत्वारिंशताधिकोनविंशतितमस्य वर्षस्य अक्टुबरमासस्य अष्टादशदिवसे (१८.१०.१९४३) पण्डितप्रबोधकुमारमहोदयस्य जन्मोऽभवत्। परम्परागतशिक्षां समाप्य कविरयं एकस्मिन् उच्चविद्यालये संस्कृतशिक्षकत्वेन कर्मजीवनस्य प्रारम्भमकोरत्। उत्तरवर्त्तीकाले स संस्कृताध्यापकरूपेण कार्यरतः आसीत्। ख्रिष्टीयद्विषष्ठ्याधिकोनविंशशतके पण्डितप्रबोधकुमारमिश्र उत्कलप्रदेशात् प्रकाशितस्य प्रजातन्त्रेत्यस्य संवादपत्रस्य सहसंपादकरूपेण योगदानं कृतवान्। ख्रिष्टीयषठ्षष्ठ्याधिकोनविंशशतके उत्कलप्रदेशस्य राज्यसंग्रहालयस्य सहकारी क्युरेटर इति पदवीं लब्धवान्। अनन्तरं स एकपत्रकाररूपेण कर्मारम्भं कृतवान्। स कटकनगरात् उत्कलभाषायां प्रकाशितस्य **मातृभूमि** इत्यस्य संवादपत्रस्य मुख्यसम्पादकरूपेण कियत्कालं यावत् कर्मरत आसीत्। तत्पश्चात् स **सहकारफाल्गुन्योः** पत्रिकयोः सम्पादनकार्येऽपि नियुक्तमासीत्। अपि च स भुवनेश्वरात् प्रकाशितस्य **नित्यनूतन** इति पत्रिकायाः सम्पादनमकोरदिति।

कविरयं जयदेवकृतगीतगोविन्दगजपतिपुरुषोत्तमदेवकृतअभिनवगीतगोविन्दयोः तुलनात्मकमध्ययनं कृतवान्। संस्कृतकाव्यपरम्परायां अस्य कवेः योगदानमतिमहत्वपूर्णमिति। तत्रापि दूतकाव्यपरम्परायां तेन प्रायः सप्तदूतकाव्यानि विरचितानि। कवेरस्य कृतयः एवं यथा- १.स्वप्नदूतम् (अस्य दूतकाव्यस्य कृते कविः ख्रिष्टीयः १९७४ तमे वर्षे तत्कालिनराष्ट्रपतिना वि.वि.गिरि महोदयेन पुरस्कृतोऽभवदिति), २.मलयदूतम् (ख्रिष्टीयः १९८९ तमे वर्षे काव्यस्यास्य कृते उत्कलसाहित्याकादेम्याः पुरस्कारमलभत), ३.रक्तझङ्कारम्(दूतकाव्यम्), ४.प्रज्ञादूतम्, ५.स्मृतिदूतम्, ६.मानसदूतम्, ७.तमसादूतम्, ८.कलाकुसुमम्, ९.कौमुदी, १०.मूर्छना, ११.प्रियदर्शिनी इन्दिरा, १२.शान्तिदूतस्मरणिका, १३.वन्दे भारतम्, १४.राधामोहन-वीणा, १५.उत्कल-गौरवम्, १६.शताब्दी-पुरुष-भक्तिसुमनम्, १७.आनन्द-सन्धानम्, १८.वन्दिन स्वदेशचिन्तादयः।

पण्डितप्रबोधकुमारमिश्र उत्कलसाहित्यमपि समलंकरोति। तस्य उत्कलभाषया विरचितानां काव्यानां नामानि यथा- १.मरालर काव्य, २.पिङ्गलार काव्य, ३.उषशीर काव्य, ४.उर्वशीर काव्य, ५.तमसार काव्य(एतानि पञ्चकाव्यानि ओमरखोयाममहोदयस्य काव्यच्छायामनुसृत्य विरचितानि), ६.व्यकरण-तरङ्गिणी, ७.नअटि कविता, ८.नअटि गोलाप, ९.मालिनीर निद्राभङ्ग, १०.मालविकार स्वप्न, ११.देवदूत, १२.युगर आह्वान, १३.गिरिकन्या, १४.नीतिवल्लरी, १५.अरुणाचल दर्शन, १६.महाकवि कालिदास, १७.कवि जयदेव, १८.कवि भारवि, १९.कवि भवभूति, २०.कवि माघ, २१.शङ्कराचार्य, २२.भगवान बुद्धदेव, २३.वीर पुरुषर गाथा, २४.सञ्जय गान्धी, २५.गिरिजन हरिजन साथी इन्दिरा, २६.लेङ्गुटिरे दाग, २७.दलितर बन्धु जगजीवन, २८.भारतर मनु आम्बेदकर, २९.विप्लवी महताव, ३०.शिशु जगतर गुरु बालकृष्ण, ३१.विचित्रानन्द स्मरणे, ३२.समाज सेवक बाबुलाल, ३३.कालरात्रिर अन्धकार, ३४.संस्कृति ओ सन्दर्भ, ३५.उच्च प्राथमिक रचना-व्याकरण, ३६.कवेर्धर्मः आदयः। अतः कविरयं संस्कृतसाहित्यस्य उत्कलसाहित्यस्य च पञ्चाशताधिकानां काव्यानां रचनां कृतवान्।

एवमेव साहित्यजगति कवेः पण्डितप्रबोधकुमारमिश्रस्य अतिमहत्वपूर्णं योगदानं वर्तते। एष कविवरः ख्रिष्टीये १९८० तमे वर्षे महीसुरसंस्कृतविश्वविद्यालयतः आशुकविरिति उपाधिं लब्धवान्। ख्रिष्टीये १९९४ तमे वर्षे उत्कलप्रदेशस्य तत्कालिनराज्यपालेन वि.सत्यनारायण-रेड्डि-महोदयेन तस्मै उत्कलस्य कालिदास इति उपाधिः प्रदत्तः। इतोऽपि नीलचक्र इति संस्कृतप्रतिष्ठानस्य पण्डितः प्रबोधकुमारमिश्रमहाभागाय कालिदास इति सम्मानं प्रददाति।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(5), January :2021
Online Copy Available: www.ijmer.in

भारतीयदर्शनं जीवनवादी, आदर्शवादी सर्वोपरि अध्यात्मवादी च। समग्रविश्वतत्त्वमेकेन अखण्डतत्त्वेन विधृत्य तस्य रहस्योद्घाटनं दर्शनस्य मूललक्ष्यम्। दर्शनस्य कार्यं जीवनस्य परमैश्वर्यप्राप्तौ नश्वरास्तित्वस्यानुसन्धानमेव। सर्वतो भावेन दुःखं परिहार्य सुखमेव जीवस्य काम्यम् – अयं भावो सर्वदर्शनस्य सारकथा।[1] परन्तु दर्शनशास्त्रं विनापि जीवनदर्शनं कवीनां कृतौ प्रकाशितम्। प्रबोधकुमारमिश्रमहाभागेनापि जीवनदर्शनं स्वकीये काव्ये प्रदर्शितम्। जीवनस्यानित्यता, जगतो दुःखस्वरूपम्, ब्रह्मज्ञानेन मुक्तीत्यादयो विषयाः कविना छन्दोबद्धपद्येन सरलशब्देन उपस्थापिताः। यद्यपि दूतकाव्येषु शृङ्गाररसस्य प्राधान्यं वर्तते तथापि आधुनिकसंस्कृतकविना प्रबोधकुमारमिश्रेण तन्मार्गं परित्यज्य नूतनदृष्ट्या दूतकाव्यं विरचितम्। तेन कविना विरचितेषु दूतकाव्येषु तमसादूतमिति काव्यं दर्शनचिन्तया परिवृतम्। तस्य काव्यस्यैव दार्शनिकतत्त्वालोचनमत्र क्रियते।

काव्येऽस्मिन्नेकेन योगिना दार्शनिकदृष्ट्या जगतः पर्यवेक्षणं क्रियते। प्रायः प्रत्येकेषु श्लोकेषु दर्शनभावना परिस्फुटिता। अत्र तमसः पूरतो जगतावेक्षणं साधकेन कृतम्। सा तमसा तेन कन्यारूपेण स्वीकृता।[2] साधकः तां कन्यां दौतकार्ये नियुज्य मानवान् प्रति वार्तां प्रेषयति। जगति सर्वत्रैव तमो विद्यते। तमः सदा आलोकमनुसरति। यतः आलोकस्याविर्भावेण तमो विनश्यति। सृष्टिरहस्यं ज्ञातुमिच्छुः साधको ब्रह्मसाक्षात्कारात्प्रागेव तमसां पश्यति। इयं शक्तिमती तमसा हि सत्यपथि स्थिरान्, अनासक्तान्, अन्तर्द्वन्द्वमुक्तान्, दैवक्षमतासम्पन्नान् मानवान् आच्छादयति।

साधारणतया भारतीयदर्शने आलोचनात्मकरूपेण केचन विषयाः परिलक्ष्यन्ते। ते यथा – जगतः सृष्टिरहस्यम्, जडजगतः स्वरूपम्, दुःखस्य स्वरूपम्, दुःखात्मुक्तिस्तथा मोक्षप्राप्तिश्चेति। तमसादूते एषां विषयानां प्रकाशो दृश्यते। सृष्टेः पूर्वं केवलं तमसैवासीत्। अखिलं ब्रह्माण्डं तस्या गर्भे सुप्तमासीत्। परन्तु अङ्गारे हीरकमिव एकालोकरेखा तमसायाः क्रोडे स्फूटमासीत्।[3] आलोकस्यानुपस्थितौ तमसैव विराजते।

प्रातः सूक्ष्मालोकेन मानवानां मनः आवेगपूर्णं भवति। अथ दीप्त्यालोकेन तेषां उच्छवासो दृश्यते। परन्तु सायंकाले पुनश्च तमसैव विराजते। तस्मादाह –

**"प्रभात-वाताहत-लोलवक्षसा**
**जनः शुभालोक-विभाव-मूर्छितः।**
**स्वरोचिषा मुग्धी भवेत् कुतूहली**
**प्रदोषघातैः त्वमहो विराजसे।।" (त.दू.[4]-१५)**

जगतोऽन्धकारमयता तथालोकशून्यता वेदादिशास्त्रेषु कथिता। तस्य विषयस्योल्लेखः तमसायाः स्वरूपेण कविना क्रियते।

तमसाच्छादनस्य उन्मोचनं भवति ब्रह्मज्ञानेनैव। वेदान्तशास्त्रेसु ब्रह्मणः स्वरूपं वर्णितम्। जगतः सृष्ट-स्थिति-लयाः ब्रह्मणि वर्तन्ते। उपमया कविना तस्मादुक्तम् –

**"समुद्रवत् रत्न-सुवर्ण-मौक्तिक-**
**तिमिंगिलादिश्च जनान्तरेऽस्ति वै।**
**गर्भे च तस्तिन् तमसे! तव स्थितिः**
**शुभ-द्युति-ब्रह्म चकास्ति तत्र च।।"(त.दू. –८६)**

ईदृशस्य ब्रह्मणः ज्ञानात् सर्वं ज्ञातुं शक्यन्ते मानवाः। परन्तु ब्रह्मसाक्षात्कारं सुदुष्करमेव। यतः तमसया प्रभावेन ब्रह्मस्वरूपमाच्छादितं भवति। वेदान्तादिशास्त्रेषु ब्रह्मसाक्षात्कारस्य बहुविधानामुपायानामुल्लेखो दृश्यते। तन्भावं मनसि निधाय अत्र काव्ये कविः साधकमुखेन कथयति यत् श्रद्धावान्, अनासक्तः, सत्यनिष्ठो जनः सत्यं तथा ब्रह्मदर्शनं कर्तुं शक्नोति। यथा –

---

[1] संस्कृतसाहितेर इतिहासः पृ. ५२०
[2]तमो बिलोक्य प्रवलात्मचेतनः
तपीश्वरः तां 'तमसेति' बोधयन्।
उवाच मुग्धो मृदुलात्मभाषया
सकृत् सुकन्ये! प्रतिवेदनं शृणु।।५।। (तमसादूतम्)
[3]सृष्टेश्च पूर्वं त्वमहो विराजसे
नक्षत्रराजिः तव गर्भ-संततिः
यद्वच्च वाऽङ्गारत एव हीरकं
आलोकरेखा क्रमवर्धिनी स्फूटम्।।२०।।(तदेव)
[4]त.दू. – तमसादूतम्

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(5), January :2021
Online Copy Available: www.ijmer.in

**"श्रद्धानुरागैः जनचित्तहारकः**
**स्नेहार्दितं यद् वचनं महोत्तमम्।**
**नित्यं य आसेवत एवं सत्यकं**
**आलोकरूपं स विलोकते ध्रुवम्।।"(त.दू. –५५)**

भारतीयदर्शनदृष्ट्या दुःखं मानवानां जीवनस्य अङ्गमेव। मानवजीवनस्यारम्भो दुःखेन भवति। जन्मकाले क्रन्दनं तदेव सूचयति। प्रायः प्रत्येकदर्शनशाखायाः तत्त्वालोचनायां दुःखस्य स्वरूपं तस्माच्च मुक्तिमार्गो दर्शितः। यथा सांख्यदर्शनं दुःखशब्देन प्रारम्भ्यते।[५] अपि च बौद्धदर्शनेन आर्यसत्यरूपेण प्रथमतया दुःखं स्वीकृतम्। अतः जगदिदं दुःखेन परिपूर्णम्। एवमेव कविना प्रबोधकुमारमिश्रेणापि जगतं दुःखपूर्णरूपेणानुभूतम्। यथा –

**"व्यथाभरं तद्जगदेव केवलं**
**तथाभिमानो हस-रोष-रागकः।**
**विवर्जिताहंकृति-दृप्ति-शीतलः**
**विशेष-भाषा भवतीह सौख्यधृक्।।" (त.दू. –३४)**

अखिलं जगत्तु अनित्यम्। अत्र सर्वेषां द्रव्यानां स्थायित्वं क्षणिकमेव। जन्मतो मृत्योर्यावत् मानवानां कार्यकालम्। अस्मिन् समये सानवा जगति तेषां लीलाकार्यं कुर्वन्ति। तदनन्तरं स्वतः तमसागच्छति।[६] परन्तु स्वल्पे कालावसरे जनाः स्वस्य परस्य च विचारं कुर्वन्ति। मानवानामीदृशी भावना तु न सुखाबहा न च कल्याणी। अतिदुःखेन कविना तस्मादुक्तम् –

**"निरर्थकं निन्दित-कृत्य-साधनैः**
**निकाम तृप्तः भवतीह मानवः।**
**निजस्य चान्यस्य विचार-भावकैः**
**विभङ्गभावात् सुखितः कथं भवेत्?" (त.दू. –४३)**

दुःखरूपद्रव्यमिदं जीवस्योपरि प्रभावं विस्तारयति। अतः अस्मात् दुःखात् मुक्तिः सर्वैः काङ्क्षिता।

धर्मार्थकाममोक्षेषु चतुर्बर्गेषु जीवस्य मूललक्ष्यं मुक्तिस्तथा मोक्षप्राप्तिः। दुःखस्यात्यन्तिकनिवृत्तिर्मोक्षः। गते दुःखे सुखमेवावतिष्ठते यत्तु सुखं प्रत्येकैर्जीवैः काङ्क्षितम्। तस्मात् दुःखस्य परिहाराय दर्शनशास्त्रेण मार्गो निर्दिष्टः। परन्तु कीदृशो जनोऽस्मात् दुःखात् मुञ्चते? तस्य विषये कविना काव्येऽस्मिन्नुक्तम् –

**"सत्वेतनं यस्य गुणस्य भूषणं**
**सद्भावनं यस्य विचार-मार्गकः।**
**सत्कृत्यकं यस्य महीष्ठ-साधनं**
**स्वभाव-दीप्तो भवदीह न व्यथा।।" (त.दू. –८५)**

अपि च ज्ञानेन दुःखात् मुक्तिः सम्भवति। संसारस्य नश्वरवस्तूनामुपरि आसक्तिर्मानवान् बध्नाति। आसक्तित्यागो हि भववन्धनात् मुक्तेर्मार्गः। एतमनुभूय कविराह –

---

[५] दुःखत्रयाभिघाताजिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।।१।। (सांख्यकारिका)

[६] इयं च पृथ्वी वर-सत्य-सारथिः
कदापि वा कस्य कृते न शाश्वती।
कियान् तु खेलः कतिकाल एव वा
तदनन्तरं त्वं समुपगता स्वतः।।४१।। (तमसादूतम्)

**INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH**
ISSN:2277-7881; IMPACT FACTOR :6.514(2020); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:10, ISSUE:1(5), January :2021
Online Copy Available: www.ijmer.in

**"बोधोदयः यस्य विबुद्ध-मानसे**
**व्याध-प्रवृत्तिः ननु नाशतां स्पृशेत्।**
**व्यालश्च कालः नतमस्तकस्तदा**
**व्यामोह-जालात् परिमुक्त एव सः।।" (त.दू. –८९)**

एवंरूपेण दूतकाव्यस्य परम्परायां भिन्नमार्गमवलम्ब्य दर्शनस्य सूक्ष्मतत्त्वानि तमसादूते कविना परिस्फूटितानि। दूतकाव्येनानेन प्राचीनदर्शनशास्त्रस्य विषयान् प्रकाश्य कविना मूलतया वर्तमानसमयस्य मोहान्धानां प्रलुब्धानामात्मविमुखानां मानवानां बोधोदयः कृतः। यस्मात् मोहान्धकारस्यावरणमपसृत्य सर्वभूतेषु आत्मदर्शनार्थं मानवानां प्रवृत्तिर्भवेदिति।

**सन्दर्भसूची –**

**मूलग्रन्थः**
मिश्र, प.प्र.कु. (२००३). ***तमसादूतम्.*** (प्रथम संस्करण). बालुबाजार कटक:विद्यापुरी ।

**सहायकग्रन्थाः**
१. मिश्र, प.प्र.कु, ड. शुखदेवभोइ(सम्पा.). (२००२). ***मलयदूतम्.*** (प्रथम संस्करण). वाराणसी:चौखम्बा संस्कृत सीरीज आफिस।

२. ईश्वरकृष्णः. अध्यापकः श्रीविपद्भञ्जन पालः(सम्पा.). (२०१०). ***सांख्यकारिका.*** (प्रथम संस्करण). कोलकाता:सदेश।

३. बन्द्योपाध्याय, धी. (१९८८). ***संस्कृत साहित्येर इतिहास (बङ्गसंस्करण).*** (प्रथम संस्करण). कोलकाता:पश्चिमबङ्ग राज्य पुस्तक पर्षत्।

४. मण्डल, प्र.कु. (१९९९). ***भारतीय दर्शन(बङ्गसंस्करण).*** (प्रथम संस्करण). कोलकाता:प्रग्रेसिभ पावलिशार्स।